# Question Paper Code : 7634

## एम.ए. (चतुर्थ सेमेस्टर) परीक्षा, 2017

### संस्कृत

वर्ग 'ख'-साहित्य

चतुर्थप्रश्नपत्रम्

### (रसगङ्गाधरो रसालोचनञ्च)

समयः : घण्टात्रयम् पूर्णाङ्काः : 70

नोट : पञ्च प्रश्नाः समाधेयाः प्रथमः प्रश्नोऽनिवार्यः। प्रतिवर्गमेकः प्रश्नोऽवश्यमेव समाधेयः।

1. अधोलिखितानां प्रश्नानां लघूत्तराणि लेख्यानि। [3×10=30]

   (क) मदीयमति चुम्बिनी भवतु कापि कादम्बिनी।

   (ख) काव्यं ययात्र निहितं न परस्य किञ्चित्।

   (ग) रमणीयार्थ प्रतिपादकः शब्दः काव्यम्।

   (घ) शब्दार्थ युगलं न काव्य शब्दवाचम्।



http://www.lucknowstudy.com

(ङ) विमलं वाक्यं त्वश्रद्धेयमेव।

(च) तस्याश्च हेतुः क्वचित् देवता महापुरुष प्रसादादिजन्य महष्टम् क्वचिच्य विलक्षणव्युत्पत्ति काव्यकरणाभ्यासौ।

(छ) प्रतिभात्वं च कवितायाः कारणताऽवच्छेदकत्वम्।

(ज) पण्डित राज जगन्नाथस्य वैदुष्यम्।

(झ) काव्यशास्त्रीयग्रन्थेषु रसगङ्गाधरः।

(ञ) एवं साधारणेष्वेषु वाक्यार्थे मुख्यार्थे बाधाभावात् तात्पर्यार्थस्य झटित्यनाकलनात् कुतोऽत्र लक्षणावकाशः।

## प्रथमो वर्गः

2. निम्नाङ्कितस्य साहित्यकी व्याख्या विधेयाः [10]

यत्र व्यंग्यप्रधानमेव सच्चमत्कारणं तद् द्वितीयम्।
वाच्यापेक्षया प्रधानीभूतं व्यङ्ग्यान्तरमादाय गुणीभूतं व्यंग्यमादायाति व्याप्ति करणायावधारणम्। तेन तस्य ध्वनित्वमेव।

3. निम्नलिखितस्य साहित्यकी व्याख्या विधेया। [10]

"गुरूमध्यगता मया नताङ्गी, निहता नीरजकोरकेण मन्दम्।
दरकुण्डल ताण्डवं नतभ्रूलिकं मामवलोक्य घूर्णितासोत्।"
अत घूर्णितासीत् इत्यनेन असमीक्ष्यकारिन्।



किमिद्मनुचितं कृतवानसि। इत्यर्थ संवलितोऽयर्थश्चर्वणा-विश्रान्तिधामत्वात्। प्राधान्येन व्यज्यते। तत्र शब्दोऽर्थश्च गुणः।

## द्वितीयो वर्गः

4. अधोलिखितस्य व्याख्या करणीया - [10]

समुचित ललित सन्निवेशचारुणा काव्येन समर्पितैः, सहृदयंहृदयं प्रविष्टैः, तदीयसहृदयतासहकृतेन, भावनाविशेषमहिम्ना, विगलित दुष्यन्त रमणीयत्वादिभिरलैकिक विभावानुभावव्यभिचारीशब्दव्यपदेश्यैः शकुन्तलादिभिरालम्बनकारणैः, चन्द्रिकाद्रिभिरूद्दीपनकारणैः, निजस्वउत्थानन्देन सह गोचरीक्रियमाणः प्राग्विनिष्टवासनारूपो रत्यादिरेव रसः।

5. अधोलिखितस्य व्याख्या सम्पादनीया। [10]

ताटस्थ्येन रसप्रतीतावनास्वाद्यत्वम्। आत्मगतत्वेनतु प्रत्ययो दुर्घटः शकुन्तलादीनां सामाजिकान प्रत्यविभावत्वात्।विना विभावमनालम्बनस्य रत्यादेरप्रतिपन्तेः।

## तृतीयो वर्गः

6. रसगङ्गाधरमनुसृत्य उत्तमकाव्यस्य लक्षणोदाहरण प्रस्तूयताम्।[10]

7. पं. राज जगन्नाथानुसारेणान्येषां काव्यलक्षणखण्डनं उपस्थाप्यताम्।[10]



http://www.lucknowstudy.com

## चतुर्थो वर्गः

8. पं. राज जगन्नाथस्य मङ्गलाचरण गुरूसंहतिः वर्णनीया। [10]

9. नव्यानां रसविषये किं मतमिति प्रतिपाद्यताम्। [10]

----- x -----



http://www.lucknowstudy.com